२कथने न० । अनिमित्तभङ्गचलनस्खेदाश्रुनिपातजल्पना- द्यानिः" हृ० सं० ४६ अ० ।

**जल्पाक** त्रि० जल्प—षाक । १वाचाले बहुकुत्सितवादिनि अमरः। २कथकमात्रे च स्त्रियां षित्वात् ङीष् । "जल्पा- कीभिः सहासीनः स्त्रीभिः प्रजविना त्वया" भट्टिः ।

**जल्पित** त्रि० जल्प—कर्म्मणि क्त । १कथिते अमरः भावे क्त । २कथने न० ।

**जल्हु** पु० दह—बा० डु पृषो० । १अग्नौ "न पापासो मनामहे नारायासो न जल्हवः" ऋ० ८।६१।११ "न जल्हवः अनग्नयः"भा० ।

**जव** पु० सौ० जु—भावे अप् । १वेगे । "जवेन पीठादुदतिष्ठ- दच्युतः" "जवेन कश्चित् सभयाः प्रपेदिरे" माघः । "जवेऽपि मानेऽपि च पौरुषाधिकम्" नैष० । कर्त्तरि अच् । २तद्वति त्रि० अमरः ।

**जवन** न० जु—भावे ल्युट् । १वेगे अमरः। "तं मन्ये मेघपुष्पस्य जवने सदृशं हयम्"भा०वि०४५अ०। कर्त्तरि ल्यु । २जव- युक्ते त्रि० "आरुह्य जवनानश्वान् नियन्तुमुपचक्रमे" हरिवं०११७अ०। ततः इष्ठन्०भावे इमनिच् । ३जवनिमन् जवे पु० । ४वेगयुक्ते देशभेदे पारस्यदेशे च हेमच०। सो- ऽभिजनोऽस्य अण् । ५जावन तद्देशवासिनि त्रि० बहुत्वे अणो लुक् । ६तद्देशवासिषु ब० व० । ७खोंकारीसंज्ञे दघोटकमात्रे च पुंस्त्री राजनि०।८म्लेच्छजातिभेदे यव- नजातौ पुंस्त्री स्त्रियां जातित्वात् ङीष् ।"जवनी नव- नीत कोमलाङ्गी शयनीये यदि नीयते कथञ्चित्" उद्भटः । रघुनन्दनमतेऽयं तालव्यादिः । जवनदेशभव- त्वादस्य तथात्वम् ।

**जवनाल** न० जवनायालति पर्य्याप्नोति अल—अच् । (जनार) फलभेदे । "जवनालं स्मृतं स्वादु शीतं वायुकरं मतम् । कफपित्तविनाशि स्यात्" राजवल्लभः ।

**जवनिका** स्त्री सौ०जु—[illegible]णे ल्युट् संज्ञायां कन् । (कानात) (चिक) प्रभृतौ व्यवधायकवस्त्रादौ अमरः । "रेजु- र्जवनिकाक्षेपैः सपक्षा इव खे नगाः" हरिवं० ८६अ० । "सतां जवनिकानिकामसुखिनाम्" माघः ।

**जवनी** स्त्री जु—करणे ल्युट् ङीप् । (कानात) १जवनिका- याम् २ओषधिभेदे च हेमच० । ३जवनजातिस्त्रियाञ्च ।

**जवस्** पु० सौ० जु—असुन् । १वेगे । "आ श्येनस्य जवसा" ऋ०११८।११ । "जवसा वेगेन" भा० ।

**जवस** न० सौ० जु—कर्म्मणि असच् । घासे शब्दरत्ना० ।

**जवा** स्त्री सौ० जु—अच् । १स्वनामख्याते वृक्षे अमरः। "जवा कटूष्णेन्द्रलुप्तनाशकृत् भिषजां मता । विच्छर्द्दिकृट्टेच- निका सूर्य्यस्याराधने हिता" राजव० । पाटला० पुष्पे- ऽपि स्त्री"अरुणो गरुडभ्राता जवापुष्पसमप्रभः"हरिवं० २२७ अ० । "जवाकुसुमसङ्काशं काश्यपेयं महाद्यु- तिम्" सूर्य्यनतिमन्त्रः । "पारिजातवनैश्चैव जवाशोक- वनैस्तथा भा० व० २३० अ० ।

**जवादि** न०"जवादि नीरसं स्निग्धमीषत् पिङ्गं सुगन्धिदम् । आतपे बहुलामोदं राज्ञां योग्यञ्च तन्मतम्"इत्यु क्तलक्षणे मृगधर्म्मजाते कृत्रिमे गन्धद्रव्यभेदे राजनि० ।

**जवाधिक** पु० जवेनाधिकः । १अधिकजवयुक्तेऽश्वे अमरः । २अधिकवेगयुक्ते त्रि० ।

**जविन्** त्रि० जव+अस्त्यर्थे इनि । १वेगयुक्ते हेमच० "सम- कालमिषुं क्षिप्तमानीयान्यो जवी नरः" याज्ञ० । स्त्रियां ङीप् । "अजवसो जविनीभिर्विवृश्चन्" ऋ० २।१५।६ ।

**जविन** पु० जव—बा० इनन् । कोकडवृक्षे राजनि० ।

**जवीयस्** त्रि०अतिशयेन जववान् ईयसुन् वतोर्लुक् । अति- शयितवेगयुक्ते "अनेजदेकं मनसो जवीयो नैनद्देवा आ- प्नुवन् मार्षत्"यजु०४०।४। स्त्रियां ङीप् । इष्ठन् जवि- ष्ठोऽप्यत्र । "कृतस्य न्यमन्ये मनसा जविष्ठा"ऋ० ४।२।३।

**जष** बधे भ्वा० उभ० सक० सेट् । जषति ते अजाषीत् अज- षीत् अजषिष्ट । जजाष जेषतुः जेषे ।

**जस** मोक्षणे दिवा० पर० सक० सेट् । जस्यति इरित् अज- सत् अजासीत् अजसीत् जजास जेसतुः अजस्रम् । उदित् जसित्वा जस्त्वा । जस्तः । [णि अजीजसत् त ।

**जस** बधे अनादरे च चुरा० उभ० सक० सेट् । जासयति उद्+हिंसने । एतद्योगे कर्म्मणि षष्ठी । "निजौजसो- ज्जासयितुं जगद्द्रुहाम्" माघः । "हत्वा नाथस्य वैदेहि ! मन्योरुज्जासयात्मनः" भट्टिः ।

**जस** गतौ निघण्टुः भ्वा० पर० सक० सेट् । जसति अजा- (ज)सीत् । जसिस्ताडने उपक्षये च माधवः। जसुरिः ।

**जस** रक्षणे चु० उभ० सक० सेट् इदित् । जंसयति ते अज- जंसत् त ।

**जसु** पु० जस—उन् । आयुधे "यद्य बलस्य पीयतो जसुम्" ऋ० १०।६८।६ । "जसुमायुधम्"भा० ।

**जसुरि** पु०जस—उरिन् ।१वज्रे उज्ज्वलदत्तः २व्याधिते त्रि०"वि या जानाति जसुरिम्"ऋ०५।६१।७।"जसुरिं व्यथितम्" "जसिस्ताडनकर्म्योपक्षयकर्म्मा वा"भा०।३उपक्षययुक्ते च।